कमलाश्लेषरसिकः कमलास्तनचन्दनः ॥ ९४॥

कमलाहृदयानन्दः कमलानयनाञ्जनः ।
त्रिवली-विलसन्मध्यः सिंहमध्यः स्मरालसः ॥ ९५॥

सुपीन-वर्तुल-स्निग्ध-क्रमस्थूलमहाभुजः ।
करिशुण्डकृतिभुजो नामासक्तकराङ्गुलिः ॥ ९६॥

स्फुरन्नखमणिश्रेणीमिश्रांशुकरपल्लवः ।
लावण्यसारसर्वाङ्गश्चन्दनाञ्चितविग्रहः ॥ ९७॥

प्रत्यङ्गरभसावेशप्रभवानन्दबन्धुरः ।
स्वभावशीतलः प्रेमदर्शितानेकपौरुषः ॥ ९८॥

सदाप्रेमभराक्रान्तसर्वाङ्गो गतिमन्थरः ।
आभङ्गुरभ्रूयुगलः ईषदारक्तलोचनः ॥ ९९॥

घूर्णायमाननयनः पूर्णचन्द्रामलाननः ।
बर्हिः श्यामायतस्थूलचमत्कारिकनीनिकः ॥ १००॥

कर्णान्तायत-दृक्पात-हेलालावण्यसूचकः ।
भाववान् स्वगुणालाप-जगतीभावदायकः ॥ १०१॥

श्रोत्रानन्द-यशोराशिर्नेत्रानन्दतनुच्छविः ।
घ्राणानन्दलसद्गन्धः हृदयानन्द-सद्गुणः ॥ १०२॥

अमृतस्रावि- दृक्पातः सुधासारार्द्रसङ्कथः ।
अमृतोद्गारिसद्वेणुसुवास्यन्दिकलस्वनः ॥ १०३॥

रसनामृतसम्भुक्तः स्पर्शामृतकराम्बुजः ।
केशामृतलसन्मूर्धाप्रकाशामृतदेहधृक् ॥ १०४॥

अनन्यसाधारणरूपयौवनः शचीतनुप्राणमनोऽक्षिरञ्जनः ।
अशेषलोकोत्सवसारदर्शनः समस्तलोकाभ्युदयोरुसद्गुणः ॥

यज्ञोपवीतधारी द्विधा विवाहोत्सवे कुतुकी ।
अखिलविनोदविदग्धः कमलालावण्यमाधुरीमुग्धः ॥ १०६॥

आचमनागतकमलास्मितसम्मुखमार्जनारसिकः
निजकर्णाहितचम्पककलिका-कर्णार्पणप्रसादपरः ॥ १०७॥

